# टिळक महाराष्ट्र विद्यापीठ, पुणे

**19E**

**संस्कृत विशारद (बी. ए.)– बहि:स्थ**

**परीक्षा : मे– २०२४**

**सत्र २ रे**

**विषय: प्रतिमा (19E422)**

**दिनांक: २३/०५/२०२४** **गुण : ८०** **वेळ : स. १०.०० ते दु. १.००**

सूचना: १) उजवीकडील अंक त्या प्रश्नांचे गुण दर्शवितात. २) सर्व प्रश्न सोडवणे अनिवार्य.

**प्र.१. चतुर्णामनुवादं लिखत।** (२०)

१) युद्धे येन सुराः सदानवगणाः शक्रादयो निर्जिता दृष्ट्वा शूर्पणखाविरूपकरणं श्रुत्वा हतौ भ्रातरौ।
दर्पाद् दुर्मतिमप्रमेयबलिनं रामं विलोभ्य च्छलैः स त्वां हर्तुमना विशालनयने! चप्तोऽस्म्यहं रावणः।।

२) क्व ते ज्येष्ठो रामः प्रियसुत सुतः सा क्व दुहिता विदेहानां भर्तुर्निरतिशयभक्तिर्गुरुजने।
क्व वा सौमित्रिर्मां हतपितृकमासन्नमरणं किमप्याहुः किं ते सकलजनशोकार्णवकरम्।।

३) दैत्येन्द्रमानमथनस्य नृपस्य पुत्रो यज्ञोपयुक्तविभवस्य नृपस्य पौत्रः।
भ्राता पितुः प्रियकरस्य जगत्प्रियस्य रामस्य रामसदृशेन पथा प्रयाति।।

४) तीर्थोदकेन मुनिभिः स्वयमाहृते ननानानदीनदगतेन तव प्रसादात्।
इच्छन्ति ते मुनिगणाः प्रथमाभिषिक्तं द्रष्टुं मुखं सलिलसिक्तमिवारविन्दम्।।

५) त्यक्त्वा तां गुरुणा मया च रहितां रम्यामयोध्यां पुरीम् उद्यम्यापि ममाभिषेकमखिलं मत्सन्निधावागतः।
रक्षार्थं भरतः पुनर्गुणनिधिस्तत्रैव सम्प्रेषितः कष्टं भो नृपतेर्धुरं सुमहतीमेकः समुत्कर्षति।।

६) यः स्वराज्यं परित्यज्य त्वन्नियोगाद्वनं गतः। तस्य भार्या हृता सीता पर्याप्तस्ते मनोरथः।।
हन्त भोः! सत्त्वयुक्तानामिक्ष्वाकूणां मनस्विनाम्। वधूप्रधर्षणं प्राप्तं प्राप्यात्रभवतीं वधूम्।।

**प्र.२. केषामपि चतुर्णां सन्दर्भं स्पष्टीकरणं लिखत।** (२०)

१) नाम्नैव भवतो राज्यं कृतरक्षं भविष्यति।
२) तपोवनात् सिद्धिरिवापनीयते।
३) अमन्त्रोक्तामिवाहुतिम्।
४) गङ्गायमुनयोर्मध्ये कुनदीव प्रवेशिता।
५) वसिष्ठवामदेवप्रभृतीनामनुमतं विदितं च।
६) छायेव न दृश्यते सीता।

**प्र.३. टिप्पणीद्वयं लिखत।** (२०)

१) लक्ष्मणः।
२) प्रतिमागृहम्।
३) नान्दी।
४) कैकेयी।

**प्र.४. एकं सविस्तरं लिखत।** (२०)

१) रामस्य व्यक्तिरेखां स्पष्टयत।
२) द्वितीयाङ्कस्य रसग्रहणं लिखत।

-------------